**संस्कृत प्रतिभान्वेषण-गीतम्**

विलसति संस्कृतप्रतिभा

विलसति संस्कृतप्रतिभा

संस्कृतप्रतिभान्वेषणलग्ना भव्या मित्र! मनोज्ञा

प्रेरयन्ति सद्गुरव: शिष्यान् नितरां गन्तुं विज्ञा:।

दिशि दिशि विद्यालयतो वटवः चलितास्सन्ति श्रुताभा:

विलसति संस्कृतप्रतिभा

विलसति संस्कृतप्रतिभा

पश्य पश्य सज्ज्ञानवनेऽस्मिन् गुञ्जति प्रतिभागानम्

अहो वटूनां वाणी कुरुते बाणभट्टसम्मानम्।

सुखिनो दृष्ट्वा हन्त पूर्वजा मोदन्ते दिव्याभा:

विलसति संस्कृतप्रतिभा

विलसति संस्कृतप्रतिभा

श्लोकानामुच्चारणमेतद् हरते चेतोऽस्माकम्

ब्रुवते गुरवो वाहवाह इति प्रेरकवचनं साकम्।

अन्नंभट्टामरपाणिनिरचनानां हन्त जिताभा

विलसति संस्कृतप्रतिभा

विलसति संस्कृतप्रतिभा

व्यासगणेशविरचिता भाषा जीवति लेखे वन्द्या

मुदिता वयं भवामो दृष्ट्वा प्रतिभामेषां धन्या

संस्कृतिसंस्कृतरक्षणहेतोर्-विलसतु राष्ट्रनवाभा

विलसति संस्कृतप्रतिभा

विलसति संस्कृतप्रतिभा

*लेखकः- डॉ. अरविन्द कुमार तिवारी*